Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४२३८

Title शास्त्रदीपिका पंचमाध्याय:

Author पार्थसारथि मिश्र:

Extent २१ पत्र Age

Subject मीमांसा

© Dharmartha Trust J&K. Digitized by eGangotri

स्मार्त्तदीपिका पंचमाध्यायः

४२३७

© Dharmartha Trust J&K. Digitized by eGangotri

४२३८
२१पत्र

शास्त्रदीपिकायां पंचमोध्यायः पत्रे २१

५

© Dhamartha Trust J&K. Digitized by eGangotri

शा॰पं॰ श्रीगणेशाय नमः श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात् प्रयुक्तिलक्षणे स्थितः प्रयोज्यवर्गनिर्णयः। प्रयोज्यगतः क्र

१ मस्त्वतः परं निरूप्यते प्रथमं तावच्छ्रुतिलक्षणो वेदविहित एव क्रमः पदार्थानामाश्रयणीयो यथावाज्यनियमः

प्रयोगप्राशुभावादनियममाशंक्य वेदमाम्नानाद्धि विहित एव क्रमः समाश्रयणीयः यद्यपि सकृच्चोदनामात्रमेव बहुकृत्वोपि

पठ्यं वदितव्यमित्येवं पुनः कथितमनेन सूत्रेण। अथवा भवति केषांचित्केषांचिन्मन्दधियामयं भ्रमः। क्रमस्याभावार्थत्वेन स्व

तो विधिर्न संभवति। न चड्यादिवत्तद्विशेषणतया। क्रमस्यैकैकपदार्थाश्रयत्वेनानवगमात्संघातविशेषणत्वात्तस्य चावि

धेयत्वाच्छास्त्राभिहितत्वाच्च क्रमस्य विध्यत्वयासंभवादविधेय एव क्रम इति। तदपनोदनार्थमिदं सूत्रं। आनुपूर्व्यं वेदतलक्ष

णं। द्व्यादिवच्च क्रमस्य विध्यत्वयासंभवादविधेय एव क्रम इति। तदपनोदनार्थमिदं सूत्रं। आनुपूर्व्यं वेदत्वयाविशेषणत्वात्।

न चासौ संघातविशेषणं। तस्यैकत्वेनाक्रमभाजनत्वात्। पदार्था यद्यपि मस्यैकं न क्रममनुलंबन्ते। परस्परामिलितास्तु संयोगा राम

दिपहिततिरूपं क्रमं बिभ्रति बहुत्वश्चेत्ते प्रयोगविधिना विधीयंत इति तद्विशेषणतयाश्च [illegible] समर्पितः क्रमः सुखं विधीय

© Dharmartha Trust J&K. Digitized by eGangotri

ते। अनभिहितोपि कथंचिद्बुद्धिमागतो यः स्थितो योग्यस्तेनि प्राकृतोपकारवद्विकृतौ शक्यते विधातुमिति विधिलक्षणमेवानुपूर्व्यमाश्र
यितमर्थंभवति। अथवा न सर्वक्रमोत्र विवक्षितो किंतु श्रुतिक्रम एव कश्चिदुदाहरणे चिंत्यते। द्वादशाहे सत्रभूते श्रूयते। अध्वर्युं
गृहपतिं दी—यित्वा ब्रह्माणं दीक्षयति।। तदिह किं दीक्षाविधीयते क्रमस्तु पाठतो लभ्यते।। अथवा क्रम एव विधीयते श्रुति
धीयत्वे क्रमो यमिति। तत्र। वाक्यार्थविधिरन्याय्यः श्रुत्यर्थविधिसंभवे। तस्माद्दी—विधिः पाठात् दीक्षाणां लभ्यते क्रमः। उच्यते।। स
र्वेषां यजमानत्वात् दीक्षा प्राप्तैव चोदकात्।। क्रमस्तु नान्यतः प्राप्त इति सोत्र विधीयते। कर्तृनियमः कस्मान्न भवति अध्वर्युरिमा
निति चोदकप्राप्तत्वादेव न त्विह यजमानानामेवार्त्विज्यकारित्वादध्वर्युर्नास्ति कथमस्य दीक्षायां प्राप्तिः।। असतो वा कथं नियमः
नियमानुपपत्तेर्वाध्वर्यवं सर्वमेकेनैव कर्तव्यं तथा ब्रह्मादिकमपि एकैकेनेति कल्प्यते तत्कारणश्चाध्वर्य्वादिशब्दैर्गौणैरभि
धीयंते इति चेत्सुतरां नियमानुपपत्तिस्सर्वस्याध्वर्यवस्यैकस्मिन्नृत्विजि कल्पिते दीक्षायामपि नियमेन तस्यैव कर्तुः प्राप्तत्वान्न
नियमविधिरवकल्प्यते तदेवं नियमविधेरुपघातकं कथं बालिशाः कल्पयंति यदि परिसंख्यावस्थितविषया अध्वर्य्वादिसंज्ञा

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा०प० व्यवहारसिद्ध्यर्थमेव कल्प्यते न तथा कल्पिते वचनत एव दीक्षायामध्वर्योः प्राप्तत्वात् क्रमार्थ एव विधिरवशिष्यते किं चाध्वर्य्वादिषु सत्स्व
२ पि प्रवृत्तित एव सर्वस्याध्वर्यवस्यैककर्तृकत्वं प्राप्तं उक्तं हि प्रवृत्ताबाध्वर्यवेष्वेककर्तृकत्वम् अध्वर्युदीणीत इति स्पष्टमतो बहुत्वश्रुतेरिति
एवं च मसाध्वर्युबहुत्वन्यायेनोपादीयमानस्याध्वर्योरेकत्वं विवक्षितं तत्राध्वर्युकार्यापि मन्यथानर्थं स्यात् तेनाध्वर्यवस्याध्वर्यु
कर्तृकत्वमेककर्तृकत्वं च प्रवृत्तावपगतं तत्र सत्रे अध्वर्य्वाद्यभावात् कर्तृकत्वे बाधितेपि एककर्तृकत्वं संभवन्न बाधितव्य
मिति सर्वथाध्वर्यवस्यैककर्तृकत्वाद्दीक्षायामपि स एव कर्ता प्राप्तः॥ सन्ति चाध्वर्य्वादयस्सत्र इति दर्शितं तत्तौये। अध्वर्यु
दीक्षायां तु चित्पतिस्त्वा पुनात्विति मन्त्रलिङ्गविरोधादितरेषु च न पूतः पावयेदिति प्रतिषेधादध्वर्योः कर्तृत्वासंभवा
दितमन्यस्तेषां यतो विशेषः स्यादित्येवं प्रतिप्रस्थात्रध्वर्यवादिषु च प्राप्तिरेवमेवं तत्तौयेषु पादिषु चनेषु चनेषु नेत्रोः
प्राप्तिरतो विधेयान्तराभावात् गृहपतिं दीक्षपति ब्रह्माणं दीक्षयति इत्येवमानुपूर्व्येण क्रीः समानानां दीक्षणीयो वितति विशे
षः प्रतिपद्यते स एव विधीयते। अनभिहितो पि प्राप्तिसिद्धेर्न विधिना विधीयमानत्वात् अश्रुति क्रमः स्तूयते। अथ पादिषु प्रयो एम २

© Dharmartha Trust J&K. Digitized by eGangotri

गविधिसंग्रहमात्रमिति विवेकः। एवं वाध्वर्युर्गृहपतिमित्यादिब्रह्मचारी वाचार्यप्रेषित इत्येवमंतं विनिविशेषे कार्यविधानादे
वंवाक्यं। यदा तु पौर्वापर्यं क्रमस्तदाक्षाश्रवणेन तदभिधानादनभिधानं नास्ति प्रतिशाखं च तत्रैदानीं नानावाक्यानीति विवेकः। त
स्माच्छ्रुतिक्रमोयं अथार्थात् अग्निहोत्रं जुहोति यवागूं पचतीति यवागूपाकहोमयोः किमनियमो अथवा पूर्वं पाकस्ततो होम इ
ति। नियमे प्रमाणाभावाद्विध्योः पाकहोममात्रपर्यवसानान्न क्रमोत्र पूर्ववद्विधीयते। अतोऽनियमः। प्रयोजनवशात्तु नियमः
।होमद्रव्यं हि यवागूः। तदिदं तस्यार्थं श्रुत्वा लिंगेन च पाकः। स पश्चात्क्रियमाणोऽनर्थकः स्यात् होमो ह्यसति द्रव्ये न निवर्तेत। अतः पाक
होमः॥ अनियमोन्यत्र॥ ॥यत्रोक्तवक्ष्यमाणनियमकारणाभावस्तत्रानियम एव क्रमस्य। यथा वसंतमृतूनामित्यादीनामेको
ममैकातस्येत्येवमादीनां च शाखाभेदेनाम्नातानां प्रयाजानुमंत्रणानां। यच्छाखागतेनानुमंत्रणेन समित्प्रथममनुमंत्रितु
स्तच्छाखागतेनैव तनूनपादादिप्रवृत्तिक्रमादिति चेत्। न प्रत्यासत्त्यनुग्रहाय हि प्रवृत्तिक्रमो वक्ष्यते नेहानेकशाखागता
नामनुमंत्रणानां मिथः प्रत्यासत्तिर्विहिता यद्वा स्ववनिरोऽयेत। अतोत्रानियमः॥ ॥क्रमेणवानियम्यतत्केवल

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा०प्र० देतद्गुणत्वात्। समिधो यजति तनूनपातं यजतीति क्रमेणावस्थितानां यागानामनियमेनानुष्ठाने श्रुतपाठक्रमेणेति॥ श्रुत्यर्थयो
३ रभावात्पाठस्य विधायकत्वाद्विधीनां च पदार्थमात्रपर्यवसानादनियम इति प्राप्ते ब्रूमः यथापाठमनुष्ठानं तथैव प्रतिपत्ति
3 तः॥ स्मृतिः प्रयोगवेलायां वाक्यैरेव च कर्म्मणां॥ ॥क्रमपठितेषु हि पदार्थेषु गन्धपुष्पादिषु तथैवानुष्ठानं लौकिकाः प्र
तिपद्यंते। वेदाध्ययनोपात्ताध्यत्प्रयोजनं शब्दनकृतं तस्य सर्वस्यार्थेन वेदोपादानं। श्रूयन्ते च विधिवाक्येभ्योपि संबंध
निमित्तं स्मरणं प्रयोगकाले पदार्थानां कर्तुमिति तदपि प्रयोजनं स्वाध्यायविधिविहितश्च पाठक्रमो विध्यवस्थाया
मनुपयुज्यमानः स्मृत्यवस्थायामुत स्मात्पाठक्रमेणात्र क्रमनियमः॥ ४॥ प्रवृत्त्या तुल्यकालानां गुणानां तदुप
क्रमात्। वाजपेये प्राजापत्याः पशवः सह क्रियंते। तत्रो पाकरण नियोजनादयः सन्निपातिनः प्रतिपश्वावर्त्तनो या
स्तेषां चावृत्तिर्नैकस्य पशोः कार्त्स्न्येन कृत्वा परस्यापि तथैव क्रियते येरस्येवं। किं तर्हि सर्वेषामुपाकरणं यतः कुतश्चित्प
शोरारभ्य कृत्वा ततो नियोजनमिति वक्ष्यामः। तत्रोपाकरणं यतः कुतश्चित्पशोरारभ्यापात्रस्तु विस्यमाप्यते। नियोज एम ३

© Dharmartha Trust J&K. Digitized by eGangotri

नारीतुसंदेहः। किंतत्राप्यनियमउतयेनक्रमेणोपाकरणंप्रवृत्तंसएवोत्तरत्रापीति। नियामकाभावात्प्रथमवत्द्वितीयादा
वप्यनियमः। प्रवृत्त्यावानियमेनप्रत्यासत्तेरहस्यहानः। अन्यथाप्यवधानंस्यात्तु दैवतानाधिकैरपि। एकैकस्यहिपशोः प
दार्थामिथःप्रत्यासन्नाःकर्त्तव्याः। वैश्वदेवींकृत्वाप्राजापत्यैश्चरन्तीतिवचनावगतपश्वन्तरसाहित्यबलात्स्वदीयैः
षोडशभिःपदार्थैःव्यवधिमनुजानातिनाधिकैः। प्रवृत्त्याचक्रमनियमेतावद्भिरेवव्यवधानंभवत्यन्यथाधिकैरपि
स्यात्तस्मात्प्रवृत्त्यानियमः। स्थानात्तूत्पत्तिसंयोगात्। साद्यस्केसहपशूनालभन्तइतिश्रुतंसाहित्यंचसवनीयस्थान
इतिस्थितंतत्रोपाकरणादीनांप्रतिपशुभेदेकिमनियमःक्रमस्यउताग्नीषोमीयस्यप्रथममुपाकरणंप्रथमंवासव
नीयस्येति। नियामकाभावादनियमेप्रकृतिदर्शनाद्वाग्नीषोमीयस्यप्राथम्येप्राप्तेसवनीयस्येत्याह। आश्विनग्रह
णेनासौपर्युपस्थाप्यतेयतः। इतरश्चलितःस्थानाल्लोपस्थाप्यतेनकेनचित्। अग्नीषोमीयप्रणयनानन्तरंह्यग्नीषो
मीयस्यस्थानं। सनेनोपस्थितोपिसहालम्भवचनेनतस्मात्स्थानाच्चलितत्वादननुष्ठितोऽत्रतुनतस्यकिंचिदुपस्थाप

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा० प० क्रमश्चि। सवनीय। स्वस्थानादस्खलितः आश्विनग्रहणादुपस्थितात्तदनंतरमुपाक्रियते। ततः साहित्यवचनादितरोपाकर
४ णं। अतः सवनीयस्यैव प्राथम्यमितरयोस्तु मिथः क्रमे त्वनियम एव। तयोरुपस्थाने विशेषाभावात्। अथवा प्रकृतिदृष्टपौ
र्वापर्यमात्रमसति बाधकेनुग्राह्यं। तथाग्निरग्नीषोमीयमुपाकृत्यानुबंध्योपाकरणं॥ ॥मुख्यक्रमेण चांगानां तदर्थत्वा
त्॥ ॥सारस्वतौ भवत इति यागद्वयं विहितं स्त्रीपुं देवत्यमेतद्धि दैव्यं मिथुनमिति वाक्यशेषात्। तत्र स्त्रीदेवत्यस्य प्रथ
ममुपस्थानं ततः पुंदेवत्यस्य याज्यानुवाक्यापाठक्रमात्। तत्र चोदकप्राप्तो निर्वापः किमनियमेन कर्तव्यः उत स्त्रीदेवत्यं नि
रूप्य ततः पुंदेवत्यमिति। नियमकारणाभावादनियमः। मुख्यक्रमात्तु स्त्रीदेवत्यं प्रथममिति निश्चितं। ननु च प्रवृत्त्या
नियमः सिध्यति येन क्रमेण याज्यानुवाक्ययोः प्रवृत्तिः स एव निर्वापादीनामुपाकरणक्रमवन्नियोजनादीनां। पूर्वप
दार्थप्रवृत्त्योत्तरेषां नियमः नोत्तरप्रवृत्त्या पूर्वेषामिति चेत्। न प्रत्यासत्त्यनुग्रहाविशेषात्तन्निबंधनत्वाच्च क्रमनियम
स्य। सत्यं मुख्यक्रमादपि क्रमनियमः सिध्यतीत्युदाहृतं। अन्यतोपि सिध्यत्यर्थे किमर्थं कारणांतरमुपन्यस्तं। यद्यपी रम ४

© Dharmartha Trust J&K. Digitized by eGangotri

ह्रियमाणयोः संकरः। न तु सर्वत्रैते प्रमाणे संकीर्णे प्रस्थिति हि तदुदाहरणं। यत्रासिद्ध्यन्यश्रुत्या नियमो मुख्यक्रमादेव सिध्य
ति। दर्शपूर्णमासयोर्दध्नः पूर्वं धर्म्माः प्रवर्त्तते शाखाहरणादयः। ततः आग्नेयस्य निर्वापादयः। याज्यानुवाक्ययो
स्तु विपरीता प्रवृत्तिः पाठवशात् तत्र भूतभावि प्रवृत्तिद्वयं च शास्त्रप्रयाजशेषाभिघारणेऽनियमः प्राप्नोति। मुख्यक्रमा
त्वाग्नेयस्य प्रथममभिघारणं। तदेतच्चतुर्थे पादे वक्ष्यामः। तस्मादनवधार्यं किं पुनः कारणं मुख्यक्रमेणाङ्गानां निय
मप्रत्यासत्त्यनुग्रहः। एवं त्वङ्गप्रधानयोर्यदि रनुज्ञातमेव व्यवधानं भवति। एतस्यां तु पश्चाद्भाविनः प्रधानस्य प्रथममङ्गं
क्रियमाणं प्रधानेनासंतं व्यवहितं स्यात्। तस्मान्मुख्यक्रमेण नियमः। अत्र प्रधानप्रत्यासत्तिरङ्गानां नियमकारणं प्रवृत्तिक्र
मे त्वङ्गानां मिथः प्रत्यासत्तिरस्येतावान् विशेषः॥ ॥ प्रकृतौ तु स्वशब्दत्वाद्यथाक्रमं प्रतीयेत। दर्शपूर्णमासयोराग्नेयानन्त
रमाज्यहविरुपांशुयाजः। ततोऽग्नीषोमीयः पुरोडाशहविः। तत्रापि मुख्यक्रमादाज्यनिर्वापः पूर्वं उत पाठक्रमादग्नीषोमी
यनिर्वाप इति॥ ॥ तत्र मुख्यक्रमादाज्यनिर्वापस्य पुरःक्रिया। पाठतस्त्वौषधस्यैव प्राथम्यमनपेक्षतः। मुख्यक्रमो हि

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा०प०
५

मुख्ययोः क्रमं प्रथमं केनापि प्रमाणेनावगम्यत इत्येषयातस्माद्धि सर्वं पतयेंगेषु कस्यमानो विलंबते। पाठतस्त्वन्यानपेक्षा रंगा
नामेव क्रमावधारणात् बलीयस्त्वमतः प्रथममौषध धर्मास्ततआज्यधर्म्माः॥ ॥मंत्रतस्तु विरोधेस्मात् प्रयोगपसामर्थ्या
त्समाद्व्यतिदेशः सः॥ इदानीयाज्योरेवमंत्रब्राह्मणगतयोर्बलाबलचिंता दर्शपूर्णमासयो इष्टी सोमीयस्य प्रथमं ब्राह्मणं
तत आग्नेयस्य विपरीतं मंत्राम्नानं। तत्र। विधिक्रमबलीयस्त्वमुत्पन्नावधारणात्। उत्पन्नेषु नियुक्तेषु च मंत्रे मंत्रक्रमो भवे
त्। विधिक्रमोत्पत्तिदशायामेव पदार्थानां गम्यते। मंत्रक्रमस्तूत्पन्नेषु पदार्थेषु मंत्रेषु च विनियुक्तेषु पश्चादिति दुर्बलः
॥ ॥नैवं स्मृतिक्रमेणैव ह्यनुष्ठानक्रमो भवेत्। स्मारकक्रमतश्चापि स्मृतीनां क्रम इष्यते॥ ॥मंत्राश्चानन्यकार्यत्वा—
त्स्मृत्यर्था विधयः पुनः। विधिनैव कृतार्थत्वान्नावश्यं स्मारकामताः। तस्मान्मंत्रक्रमेणैवानुष्ठानं। तदभावे तु विधिरपि
स्मारक इति तत्रैव तत्क्रमस्य प्रामाण्यं॥ ॥तद्वचनानुविकृतौ यथाप्रधानं स्यात्॥ आग्नावैष्णवमेकादशकपालं निर्वपे
दभिचरन्सरस्वत्याज्यभागास्याद्बार्हस्पत्यश्चरुरिति। तत्रोपांशुयाजाग्नेयविकृतः सोऽन्यबार्हस्पत्ययोः कस्य धर्माः प्रथ

एम
५

© Dharmartha Trust J&K. Digitized by eGangotri

ममनुष्ठेयाः । किं प्रयोगविधिचोदितांगप्रधानप्रत्यासत्त्यनुग्रहात् मुख्यक्रमेणान्यधर्माणां प्रथममनुष्ठानमुत चोदकवशा
दाग्न्यधर्मेभ्यः पूर्वं बार्हस्पत्यौषधधर्माः कर्त्तव्या इति ॥ ॥ तत्रोपदेशिकत्वेन प्रयोगवचनाश्रयः । मुख्यक्रमोऽतिदेशेन प्रापितं
बाधते क्रमं । नैवं प्रत्यासन्नानां हि पदार्थानां विप्रकृतौ क्रमचिंतनं । ते च सक्रमका एव प्राप्यन्ते चोदकादिह ॥ न एकांश्यात् क्रमस्ते
षां नष्टोऽन्यः प्रकल्प्यते । शरवत्तस्य बाधोऽत्र कल्प्यतान्नोपपद्यते । शरमयं बर्हिरिति क्लृप्तं शास्त्रं पूर्वप्राप्तकुशबाधेन प्रवर्त
ते । कल्प्यस्तु प्रयोगवचनाश्रयः क्रमः । कल्पना चाकांक्षाधीनानि एकांक्षाश्चेह पदार्था इति न कल्पनं संभवति ॥ ॥ विकृतिः
प्रकृतिधर्म्मत्वात्तत्कालास्या यथाशिष्टं ॥ ॥ चातुर्मास्येषु साकमेधस्य तृतीयं पर्वान्तरं श्रूयते । अग्नये नीकवते प्रातरष्टा
कपालं निर्वपेन्मरुद्भ्यः सांतपनेभ्यो मध्यंदिने चरुं मरुद्भ्यो गृहमेधिभ्यः सायमिति किमेता गृहकाला इष्टय उत सद्यःकाला
इति ॥ ॥ तत्रातिदेशतस्तासां प्राप्नोति गृहकालता । प्रातःश्रुतेर्विरोधश्च नामावास्याश्रुतेरिव । पदस्येति वचनं सांगा
नि कर्म्माण्यमावास्याकालं प्रत्युपादत्ते न तु योरङ्गोक्तत्कालासंभवात् युक्तं पदानि देशिकं गृहकालत्वं बाधते प्रातरादिश्रुति

© Dharmartha Trust J&K. Digitized by eGangotri

शा०प्र० स्तहर्दयिप्रातःकालसंभवा इति दिशाविरोधिनी । न न ह्यधं कर्तुमुत्सहते । तस्माद्यतने । षु प्रातरादिषूपक्रम्य श्वस्तनेषु प्रातरादि
६ षु समापनीया इति प्राप्ते ब्रूमः ॥ ॥ सांगं प्रारिप्सितं कर्म प्रातःकाले विधीयते । स चाविशेषात्तंत्रेण सर्वस्यैको भविष्यति ।
6 चिकीर्षितार्थे न हि कालो विधीयते सर्वांगयुक्तप्रधानभावनाविचिकीर्षितानेकदेशमात्रमतो य एवैकः प्रातरादिकालः
प्रयोगाय संगृह्यते स एव सर्वप्रारिप्सायां संगृह्यमाणः प्रारंभापरनाम्नः प्रक्रमस्याविशेषात्तंत्रे ऐक एव सर्वांगयुक्त
प्रधानार्थेनोपात्तो भवति । न प्रातर्दयस्यावकाशः । तस्मादुपदेशात्तद्यस्कालः । अंगानां मुख्यकालत्वाद्यथोक्तमुत्कर्षे
स्यात् । अग्नीषोमीये पशौ प्रकृतितो हविरासादनोत्तरकाले प्राप्तानां प्रयाजानामपकर्षः श्रुतः तिष्ठंतं पशुं प्रयजंतीति
तथोत्कर्षः सवनीये नूयाजानामग्निमारुतादूर्ध्वमनूयाजैश्चरंतीति तत्र किं श्रुतमात्रनिष्ठावुत्कर्षापकर्षावुत तदाप
कर्षस्तदंतापकर्ष इति संशये ॥ ॥ श्रुतोत्कर्षाभ्यां वचनस्योपपत्तितः । न तदंततदादीनां भवेतामप्रमाणको । प्रधान
सन्निधिश्चैवं बाधितो न भविष्यति । ऊहपूर्वपदार्थानामेवं प्राप्तेभिधीयते । पूर्वेणोपस्थितं कार्यमुत्तरं कर्म चोरका एम ६

© Dharmartha Trust J&K. Digitized by eGangotri

त्। प्रासंतदन्यथाभावेक्रमलोपादिलुप्यते। अनूयाजोपस्थितास्तदुत्तरकालं सूक्तवाकादयः कर्तव्याः अनुयाजेषूत्कृष्टेष्वनूत्कृष्टाः
पूर्वोक्तिप्रमाणाविगुणाः स्युः। एवमाद्या ऐन्द्रकाले कर्तव्याः प्रयाजाः केवलाअपकृष्यमाणाः क्रमलोपात् दुष्येयुः। तस्मात्त
द्वारीनामुत्कर्षस्तदंगानां चापकर्षः॥ ॥प्रकृत्याकृतकालानां॥ ॥प्रातरनुवाकप्रैषहोत्रेदत्वानंतरं प्रतिप्रस्थातः स
वनीयान्निर्वपस्वेति प्रेष्यतीति विधानानंतरं प्रचरणीहोमादयः सौमिकाः पदार्थाः पठितास्तत्र प्रैषवशान्निर्वपस्या
वत्तदेव कर्तव्यः तदनंतरं सौमिकाः पदार्थाः कर्तव्याः अग्निदग्नीन्विहर बर्हिस्तृणीहि पुरोडाशानलंकुरुर्विस्येतस्मिन्प्रैषपर्य
नास्तत ऐष्टिकाः प्रोक्षणादयउत प्रोक्षणादीन्याग्लंकरणान्तत्वात् ततः सौमिका इति निर्वापः प्रतिपस्यातत्कृत कृत्वान्ना
ध्वर्योः प्रोक्षणमुपस्थापयति सौमिकानामपि निर्वापिण्यवहितानां नास्त्युपस्थापकं तस्मादनियमः। उच्यते। निर्वापि
ध्वर्योरपि कर्तृत्वमस्ति प्रयोजकत्वात्। अतो सौ प्रोक्षणादीनुपस्थापयति। अतस्तेतावत्कर्तव्यास्ततः सौमिकाः। अ
संयोगात्तु वैकृतं तदेव प्रतिकृष्येत्॥ ॥ज्योतिष्टोमेग्नीषोमीयप्रणयनात्परतो यूपच्छेदनं पश्वंगमाम्नातं दीक्षासु

© Dharmartha Trust J&K. Digitized by eGangotri

शा०प० पूर्वं छिन्नतीत्यपकृष्यमाणमग्नीषोमीयप्रणयनादानपकर्षतिउतनेतिसंशये। प्रयाजवदाघारादानपकर्षतीतिप्राप्तउच्य
७ ते॥ ॥सौमिकेनपदार्थेनपाशुकस्यनहिक्रमः। अंगंतदपकर्षेणसौमिकोनापकृष्यते। आघारेतरकालत्वंप्रयाजादीना
मंगंतन्माबाधीतियुक्तंयत्तदपकर्षेप्याघारेपकृष्यते। पाशुकस्यतुयूपछेदनस्यनसौमिकाग्नीषोमप्रणयनानंतर्यमं
गंयत्तिद्यर्थंप्रणयनमपकृष्येतभिन्नप्रयोगवचनपरिगृहीतत्वात्तयोः। एकप्रयोगान्तर्गतानांहिमिथःक्रमोंगंभवति।
तस्माछ्रुतमात्रापकर्षः॥ ॥प्रासंगिकंचनोत्कर्षेदसंयोगात्॥ ॥सवनीयपशुतंत्रेसवनीयपशुपुरोडाशेषुप्रसज्य
ते। दाक्षिणाग्निकौतुपिष्टलेपफलीकरणहोमौपशावविद्यमानौपशुपुरोडाशार्थंकर्तव्यौतौपाशुकैरन्त्ययाजेराग्नि
मारुतादूर्ध्वमुत्कृष्यमाणेरुत्कृष्येतेनेतिसंशये। प्रकृतौतत्परत्वेनदाक्षिणाग्निकयोःकृतक्रमत्वादुत्कर्षेप्राप्तेत्रापिप्र
योगभेदादनुत्कर्षः। पाशुकैस्त्वन्त्ययाजैर्नपौरोडाशिकयोर्होमयोःक्रमोंगंयतउत्कृष्येयातांपौरोडाशिकास्त्वन्त्यया
जानेवक्षिपंतेनोत्कृष्यंतेयेहत्कृष्यमाणेदाक्षिणाग्निकहोमयोरुत्कर्षः। तस्मात्तयोःस्वस्थानएवानुष्ठानं॥ ॥त राम ७

© Dharmartha Trust J&K. Digitized by eGangotri

थापूर्वं॥ ॥दर्शपूर्णमासयोर्हविरभिवासनोत्तरकालावेदिरम्नाता पूर्वेद्युरमावास्यायामपकृष्यमाणा हविरभिवासनात्प्रा
ग्राथनिपकृष्यतिनेतिसंशये एकप्रयोगसंबंधित्वात्पाठतश्च क्रमकृमेरनपकर्षे क्रमलोपेन विगुणा वेदिः स्यादिति प्राप्ते
ब्रूमः॥ सामान्येन क्रमोंगं स्यात्पाठतः प्रक्रियावशात्। विशेषतः श्रुतं वाक्यादमावास्ये क्रमांतरं। हविरभिवासनोत्तरका
लता हि दर्शपूर्णमासयोः सामान्यप्राप्त्यामावास्यायां स्यात्। पाठश्च तत्स्यप्रमाणं प्रकरणाच्च विनियोगः पूर्वेद्युरनुष्ठा
नं त्वमावास्यायामेव विशेषतो विहितं श्रौतश्चायं क्रमः। वाक्येन चामावास्यायां विनियोगः तत्र यावद्दैवदैव हविरभिवा
सनोत्तरकालता स्यात्। क्रमो दुर्बलप्रमाणको नैव कल्प्यते तावत्पूर्वेद्युरनुष्ठानं चोद्यमानमकृतक्रमस्य वेदिमात्रस्य चो
घतेन ततः प्राचां तस्मादत्रापि श्रुतमात्रापकर्षः। सांतपनीयानूत्कर्षेदग्निहोत्रं सवतवद्द्वैगुण्यात्॥ ॥मध्यः सांत
पनेभ्यो मध्यंदिने चरुमिति श्रुता सांतपनीया मध्यंदिन उपक्रांता देवान्मानुषो द्राग्प्रतिबंधात्सा यं कालं यावदुत्कृष्टा
ग्निहोत्रमुत्कर्षति नेति संशयः। यद्यपि चात्र भिन्नप्रयोगयोः सांतपनीयाग्निहोत्रयोर्न मिथः क्रमोंगं तथापि सायं

© Dharmartha Trust J&K. Digitized by eGangotri

शा०पं०
८
8

कालेद्वयोः सन्निपतितयोरस्वरूपं भाविनियोर्व्विपर्ययेसांतपनीयां कृत्वा क्रियमाणस्याग्निहोत्रस्य कालातिपत्तिप्रसंगेस
ति किं न्याय्यमिति युक्ता चिंता। तत्र सांतपनीयातावत्स्वकालं मध्यंदिनमतिपन्नैव तस्याः कश्चिदुभयथापि न विशेषः।
अग्निहोत्रस्य तस्मिन्काले क्रियमाणस्य प्रणयनलोपः स्यादुत्कर्षे तु काललोपः। तत्र कस्यानुग्रहः कस्य लोप इति चिंत्यते
।तत्र मुख्यत्वात्प्रणयनानुग्रहे सांगप्रयोगावधारणोत्तरकालप्राप्तेः कालस्य जघन्यत्वेन बाध इति प्राप्त उच्यते। का
लस्यानुपादेयत्वेन निमित्तविशेषणत्वात्तस्मिन्प्राप्तमग्निहोत्रं किंचिदंगमपहायापि कर्तव्यं। तस्मादग्निहोत्रं हुत्वा सांत
पनीयासमापनीया॥ ॥षोडशी चाव— संयोगात्तज्योतिष्टोमे षोडशिनं प्रकृत्याम्नंति। तं परं च मुक्थ्येभ्यो निग
ह्णातिषोडशिनमिति। तथा दैवाडुक्थ्यानामुत्कर्षो भवति किं तदा षोडश्युत्कृष्यते नेति संशयः॥ ॥तत्र नोत्कर्षणं
युक्तं स्तोत्रकालोपसंग्रहात्। उत्कर्षपक्षे हीपेत— कालात्स्तोत्रमस्या हि। यदि हि षोडशिग्रहयागाभ्यास उत्कृष्येत। त
तः प्रधानकालत्वादंगानां ग्रहं वाग्रहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति वचनात्तदंगभूतं स्तोत्रमप्युत्कृष्येत। तत्र

राम
८

© Dharmartha Trust J&K. Digitized by eGangotri

समयाविधिने सूर्ये षोडशिनस्तोत्रमुपाकरणे नीतिविहितः कालो बाध्येत। ननु नुत्कर्षपक्षे षुक्थ्यपरभावो बाध्येत बाध्य

तां क्रममात्रं हि तत्कालस्तु बलो यानित्युक्तं। तस्मादनुत्कर्षः॥ ॥उच्यते॥ ॥क्रमोपि तु प्रधानांगभूतत्वाद् बलवान्सो। का

लस्तोत्रांगभूतत्वात् दुर्बलो बाधमर्हति। न परं च मुक्थ्येभ्य इति वचनात्षोडशियागाभ्यासस्य उक्थ्यापरभावोंगं सोनुत्क

ष्यमाणे प्रधानांगं संहृद्बाध्येत। न चैतत्क्रममतो वरमगभूतस्तोत्रांगस्यैव कालस्य बाधः स्युत्कर्षः॥ ॥इति शास्त्रदी

पिकायां पंचमस्य प्रथमः पादः॥ ॥सन्निपाते प्रधानानामेकैकस्य गुणानां सर्वकर्म स्यात्॥ ॥वाजपेये प्राजापत्याः

पशवो वैश्वदेवीं कृत्वा प्राजापत्ये श्चरंतीत्येकस्मिन्काले विहिताः। सहप्रयोक्तव्याः। तेषामारण्डपकारकाणां तंत्रं द्रव्यसंस्का

रस्तूपाकरणनियोजनादयः प्रति पशु भेदेन कर्तव्याः। ते किमेकैकस्य कार्त्स्न्येन कृत्वा ततो परस्य कर्तव्याः किं वोपाकरणं

सर्वेषां कृत्वा ततो नियोजनमिति। तत्र। एकैको हि पशुः स्वांगान्यव्यपेतान्यपेक्षते। चोदको प्येवमेवातः कांडानुसमयो भ

वेत्। प्रयोगवचनावगतसाहित्यबलेन त्वेकैकस्य पशोर्द्धर्माः संश्लिष्टाः कर्तव्याः। प्रकृतौ चोपाकरणादीनामानंतर्यं

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा०प०
६
9

कृतमिहापि प्रतिकर्मविसाधिना चोदकेन प्रतिपशुप्राप्यते। अत एकस्योपाकरणादिकं सर्वं गुणकांडं कृत्वा ततो परस्य कर्तव्यं वा
चनिकं तु साहित्यमाएड्डपकारकतंत्रत्वादप्युपपन्नं॥ ॥उच्यते॥ ॥वचनेनैव कालतंत्रं पशूनामिह चोदितं। न तत्प्रयोगवच
नाच्चोदकाद्वापि बाध्यते। कालत्यनिकं प्रयोगवचननिबंधनं साहित्यं चोदकं चानुमानं प्रत्यक्षवचनेन तु वैश्वदेवीं कृत्वा प्राजाप
त्येषु चरंती त्येककालप्रयोगः पशूनामवगम्यते॥ अतोपस्मिन्नेव क्षणे एकस्योपाकरणं कर्तव्यमापतति तस्मिन्नेवापरस्यो
पाकरणं कर्तव्यं स दर्शकालतया केवलं न क्रियते द्वितीये तु क्षणेन कश्चिद्धेतुर्येन पश्वंतरं नोपाक्रियेत। अतः प्रथमं पदार्थं सर्वे
षां कृत्वा ततो द्वितीयादिः कर्तव्यः। एवं दर्शपूर्णमासादिष्वप्यनेकप्रधानसमवाये पदार्थानुसमय एवन्याय्यो न तु कांडानुस
मय इति स्थितं। यत्र तु प्रधानविरोधो भवति पदार्थानुसमयेन तत्र कांडानुसमय एवेति। यथाश्वप्रतिग्रहेष्टौ। तेसह स्वेषा
पुरोडाशेष्वप्यमाणेषु यदि सर्वेषामधिश्रयणं कृत्वान्यस्योद्वासनं क्रियेत ततः सदत्येत। तस्मान्न तत्र प्रधानविरोधेन एम
पदार्थानुसमयः। मुष्टिकपालोपनावदार्थानुसमयः। मुष्टिकपालोप नोजनाभ्यंजनपवनपावने षुचैकैकेन॥ ॥ ९

© Dharmartha Trust J&K. Digitized by eGangotri

दर्शपूर्णमासयोराग्नेयाग्नीषोमीयनिर्वापयोः परार्थानुसमये स्थिते संशयः किमेकैकेन मुष्टिनानुसमय उत चतुर्मुष्टिभि
रिति। यद्येकैको मुष्टिः पृथक् परार्थस्तत एकैकेनानुसमयः। अथ चतुर्मुष्टिनिर्वाप एकः परार्थस्ततः चतुर्मुष्टिभिरिति
॥ ॥प्रतिमुष्टियत्नीभावः पर्यवस्यन्नहि दृश्यते। मुष्टिनामुष्टिरेवातोनुसमये न संशयः॥ ॥उच्यते॥ ॥अंगत्वं चोदना
गम्यं परार्थश्चांगमेव नः॥ चतुर्णामिह मुष्टीनां निर्वापः शास्त्रचोदितः। अंगं प्रयाजयोर्द्विपरार्थशब्दस्तेन ययोः प्रधानयोः
सहानुष्ठानं तयोर्यदंगं तदेकस्य कृत्वा परस्य कर्तव्यं। चतुरो मुष्टीन्निर्वपतीति शास्त्राच्च चतुर्मुष्टिनिर्वापोंऽगं। एकैकस्तु मु
ष्टिस्तदवयवो न परार्थस्तथाविधानात्। परार्थेन चानुसमयो न तदवयवैरतश्चतुर्भिरनुसमयः। एवं कपालोपधानेपि
नैकैकेनानुसमयः। किं त्वाग्नेयकपालानि सर्वाण्युपधायाग्नीषोमीयस्योपधानं। एवं द्विहविषोवघाते स्वत्रापि नैकावदाने
नानुसमयः। एवमंजनादिष्वपि योज्यं॥ ॥संयुक्ते तु मन्त्रमात्रं तं स्यादितरस्य तदर्थत्वात्॥ ॥दर्शपूर्णमासयोर्द्विहवि
षोवघातो निश्रुतं। तत्रैकैकेनावदानेनानुसमय इति स्थितमिदानीं तु किं द्वाभ्यामवदानाभ्यामनुसमयोथवावदानादि

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰ प॰ १० 10 मदानांतेनेति चिंत्यते। तत्र। वचने न हि संख्याक्रमवदानं विधीयते। तावानेकः पदार्थो निस्तावता नुसमीयते। नैवं होमविधेर
र्थात्खंडने प्रापिते सति विशेषमात्रं हविषो हूरित्यत्र विधीयते। चतुरवत्तं जुहोतीत्यवत्तस्य होमो विधीयते। न चाकृत्वाव
दानमवत्तहोमः संभवत्यर्थप्राप्तमवदानं न विधातव्यं। इह हविषो वपतीत्यर्थप्राप्तस्यावदानस्य विशेषमात्रस्य विधानं
हविषो हूरिति। यद्यपि विधीयते। तथापि दृशार्थत्वाच्चतुरवत्तं जुहोतीत्यस्यापवर्तेनैव विधेयं न स्वातंत्र्येण। अतोवदानादिप्र
दानांतेनानुसमयवचनात् परिव्याणांतमंजनादि स्यात्॥ ॥अग्नीषोमीये पशौ यूपधर्माः अंजनमुच्छ्रयणं संमानं परिव्या
णमिति यूपगणे चोदं॥ कः प्राप्तः। किमेकैकशोनुसमेतव्या उतांजनादिना परिव्याणांतेनादिना परिव्याणांतेनानुसमय इति
संशये पूर्वेण न्यायेन पदार्थानुसमयः॥ ननु अंजनादि परिव्याणांतं यजमानो यूपं नावसृजेदिति प्रकृतावनसर्गश्चोदकेनेह प्रा
प्तः कथमेकैकशोनुसमीयमाने शक्यते कर्तुं। एवं मन्यते। प्रकृतावार्थिकोनवसर्गो यजमानेनाध्वर्योः साहाय्यमाचरता
नुष्ठितस्य रज्जुधारणमात्रवचनं न चार्थिकं चोदकः प्रतिदिशति। अतः पदार्थानुसमयः॥ नैवं नियोगतो प्राप्तेरनुत्स राम १०

© Dharmartha Trust J&K. Digitized by eGangotri

गोविधीयते। वाक्यं चार्थवद्देवं स्याद्धि द्वमात्रं त्वनर्थकं। गणेऽपि चोदकेनातः प्राप्तेन वसर्जनं। तेनाङ्गनाविसंघो त्वसंघेनानुसमीय
ते॥ ॥यस्तु गणेन तस्य तस्यापवर्ज्जयेत् पश्वेकत्वात्॥ ॥अग्निषोमीयपशावपदानानन्तरं प्रदाने प्राप्ते वचनमिदमाम्नायते दे होमः
वतान्यवदायन तावत्येव होतव्यं सौविष्टकृतान्यवद्यतिसौविष्टकृतान्यवदायन तावत्येव होतव्यं ऐडान्यवद्यतीति। नैदकदेव
तेषु पशुगणेषु विचार्यते किमेकस्य पशोर्दैवतसौविष्टकृतैडान्यवदापापरस्यापि त्र्यममवदातव्यं। उत सर्वेषां दैवतान्यवदाय
ततः सौविष्टकृतानि ततऐडानीति। तत्र॥ ॥प्रकृतौ दैवतादीनामानन्तर्यमिहापितत्। एकैकस्य पशोः कार्यः कांडानुसम
यस्ततः॥ यद्येकस्य पशोर्दैवतान्यवदाय परस्य दैवतान्यवदीपेरन्नतः प्रथमस्य पशोर्दैवतसौविष्टकृतानन्तर्यं चोदकप्राप्तं
तद्बाध्येत तस्मात्कांडानुसमयः। नैवं॥ ॥पश्वैकात्म्यकृतावर्थादानन्तर्यमनुष्ठितं। इह त्वनेकसाहित्यात्साजात्यानुसमी
यते। यावन्न परार्थाः कर्तव्यास्ते मिथः संश्लिष्टाः कर्तव्या इत्येतावत्प्रकृतौ विवक्षितं। तत्रैकत्वात्पशोर्दैवतसौविष्टकृतानन्तर्य
मर्थात्संजातं। ननु नादिह प्राप्यते। अत्र तु साहित्यसंपन्नये समानजातीयैः समानजातीयानामनुसमयो देवेन दैवतानामि

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰ प॰ २१ मित्येवं कर्तव्यं ॥ ॥नानाबीजेष्वेकमुलूखलं विभवात्॥ ॥एतत्सूत्रं येन नानाबीजेष्टिरन्वेयेत गृहपतये श्याकपालं कृष्णानां व्रीही
णां सोमाय वनस्पतये श्यामाकं चरुमित्यादि। तत्र प्रकृतितः प्राप्तमुलूखलं किं तन्त्रमुत भिन्नमिति विचारः। फलविचा
रश्चायमधिकरणाशरीरं तु किं कृष्णाजिनास्तरणोलूखलाधिवर्तनबीजावापावघातपरावर्तनविवेचनफलीकरणानि पृथ
क्परार्थत्वादेकैकशोनुसमेतव्यानि उत कृष्णाजिनास्तरणादिफलीकरणान्त एकः पदार्थस्तावतावचानुसमय इति। तत्र
नानापदार्थत्वं विधिभेदेन मन्यते। तण्डुलीकरणं शास्त्रात् पृथक्त्वं तु गम्यते। यद्यपि कृष्णाजिनमधस्तादवस्तृणाति शूर्पेण
विविनक्तीति विधिभेदस्तथापि तण्डुलभावनावयवत्वेन तद्विधानं न स्यात् तत्त्वेणाद् पदार्थत्वप्रसंगादेकाचासौ तण्डुलभावना
कृष्णाजिनास्तरणादिफलीकरणपर्यन्तं प्राप्तेनेति तावानेकः पदार्थ इति तावतानुसमयः। संयुक्ते तु मन्त्रमादित्यत्र च
तुरवत्तचोदनयार्थप्राप्तावदाने संख्यामात्रं द्विर्हविष इति विधीयते न तु द्वित्वविशिष्टमवदानमित्येकपदार्थत्वं भि
एकृतमिह तु सत्यपि विधिभेदे वयवत्वेन विधानादनन्यत्वमुच्यते। यत्तु तत्रसेत्यापि विधिभेदे न्यत्वं नास्त्वो स्युक्तं त एम ११

© Dharmartha Trust J&K. Digitized by eGangotri

दिह सिद्धमेवोक्तमित्यनवद्यं॥ ॥विकारे त्वनूयाजानां पात्रभेदोऽर्थभेदात्स्यात्॥ दर्शपूर्णमासयोरग्नावुपभृति गृह्णातीति
प्रयाजानूयाजार्थं चतुर्गृहीतद्वयमेकस्यामुपभृति युगपद्गृहीतं तथैव पशौ प्राप्तं तत्रानूयाजानां द्रव्यविकारः श्रूयते। पृ
षदाज्येनानूयाजान्यजतीति प्रयाजाज्यं त्वविकृतमेव॥ तत्र द्वयोरसंकरेऽवश्यंभाविनि चिंत्यते किं कालभेदेन तस्यामेवोप
भृति द्वयं गृहीतव्यं। उत तस्मिन्नेव काले पात्रभेदेनेति। तत्र। परार्थत्वादुक्तत्वाच्च पात्रैकत्वस्य संग्रहः। गुणत्वात्पाठक्रमस्य
त्वात्क्रममात्रं तु बाध्यते। अग्नावुपभृति गृह्णातीति श्रुतमेकत्वं परार्थश्च क्रमस्तु परार्थानां गुणः पाठक्रमश्च तत एक
स्मिन्नेव पात्रे प्रयाजाज्यं गृहीत्वा प्रयाजेषु हुतेषु पश्चात्पृषदाज्यं गृहीतव्यमित्येवं प्राप्त उच्यते। उभयोर्ग्रहणागतत्वात्पा
त्रैकत्वस्य क्रमस्य च। विकृतौ चानुमानेन प्राप्तेस्तुल्यं बलाबलं। एवं चाविशेषे सति प्रयाजाज्यग्रहणेनोपस्थितस्यानुया
जाज्यग्रहणस्याकरणे न किंचित्कारणमस्तीति तदैव पात्रांतरमुपादाय गृहीतव्यं॥ ॥प्रकृतेः पूर्वोक्तत्वादपूर्वमन्ते स्या
न्न ह्यचोदितस्य शेषाम्नानं। अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेदिति नक्षत्रेष्टिं विधायोपहोमा विहि

© Dharmartha Trust J&K. Digitized by eGangotri

शा॰प॰ ताः सोऽनुजुहोति अग्नये स्वाहा आहुतिकाम्यः स्वाहेति प्रकृतौ च प्राधानानान्तरं नारिष्टहोमास्ते चोरकेनात्र प्राप्तास्तत्र संशयः
१२ ॥किमुपहोमानकृत्वा ततो नारिष्टा विपरीतं वेति॥ ॥ऽनेन प्रधानानन्तरमश्रुतानाम्। उपहोमाननुष्ठाय नारिष्टानामनुष्ठितिः॥
उच्यते॥ ॥कृतोपकारस्साकांक्षा विकृतिः प्राकृतं पुरः गृह्णाति वैकृतं पश्चात्तदाकांक्षावशीकृता। प्रकारापेक्षा हि विकृति
12 भावना प्रत्यक्षश्रुतमपि सन्निहितमक्रमोपकारं परित्यज्य प्राकृतं प्रकारमुत्पादकपदार्थविशिष्टं प्रथमं गृहीत्वा पश्चा
त्सन्निध्याम्नातांगप्रयोजनापेक्षावशेन वैकृतं गृह्णाति तेन यत्र प्राकृतवैकृतयोरेकस्थानपतितयोः क्रमापेक्षा तत्रा
वगतिक्रमानुसारेण प्राकृतं कृत्वा वैकृतं कर्तव्यं। न च प्रत्यक्षपाठविरोधः प्रधानवाक्यशेषेण हि प्रकृतिवद्भूतेन प्रापि
तास्याकृतास्य पश्चाद्वैकृतं पठितं भवति। तस्मान्नारिष्टान् कृत्वा पश्चादुपहोमाः कार्याः॥ ॥कृतदेशात्तु पूर्वेषां संदेशः
स्यात्तेन प्रत्यक्षसंयोगान्न्यायमात्रमितरत्। एतत्सूत्रमभिषेचनीये सोमयागे विधायानन्तरं विदेवनादयोऽभिषेकान्ताः राम
पदार्था विहितास्तत्राभिषेकोऽभिषेचनीये प्राकृतांगमध्ये पठ्यते माहेन्द्रस्तोत्रं प्रत्यभिषिच्यत इति। सोपकृष्यमाणः प्राचो १२

© Dharmartha Trust J&K. Digitized by eGangotri

र्विदेवनादीनपकर्षति नेति संशयः तत्र। अपूर्वोऽस्त्यभिषेकोऽतोऽनन्तरं ताऽपकर्षणं करोति वेदिवत्तस्मात्तन्मात्रमपकृष्यते॥ तथापूर्व-
मिलनस्येतरद्वस्थितं। अपूर्वः परार्थोऽपकृष्यमाणेन प्राचामपकर्षपि कल्प्यत इति। तेन यथापूर्वैर्घृतमाज्यास्यायां वेदिं
करोतीति वेदिमात्रापकर्षोऽङ्गीकृतस्तत्क्रमत्वान्न पूर्वेषां तथात्राप्यभिषेकस्यैवापकर्षोऽन्यत्वं तेतु वादरायण इति न्यायादभिषे-
चनीयसकलप्राकृतांगोत्तरकाले कर्तव्या इति प्राप्तेऽभिधीयते॥ ॥अभिषेकेन पूर्वेषांक्रमः प्रत्यक्षपाठतः। परत्वं प्राकृतां-
गेष्वस्त्वनुमानेन गम्यते। यद्यप्यत्र प्रकृतिपूर्वत्वेन प्रयाजादिवैलक्षण्यादपकर्षविस्याधांवेदिवत्कृतक्रमस्तथात्रैवक्र-
मकल्पनायामभिषेकपूर्वभावित्वं विदेवनादीनां प्रत्यक्षपाठनिमित्तमभिषेचनीयप्राकृतांगोत्तरकालतावृतेषामनुमा-
नात्तत्वदुर्बलमतः प्रत्यक्षपाठाद्विदेवनादीनामभिषेकात्पूर्वानुष्ठानात्तदन्तापकर्षः॥ ॥प्राकृतात्त्पुरस्ताद्यत्॥ ॥
अग्नौ सावित्रहोमो यत्सम्भरणाद्यपूर्वपदार्थान्विधाय पश्चात्तदीक्षणीयादयः प्राकृताः सगुणाः श्रुताः। तत्र दीक्षणी-
यादीन्त्वा सावित्रादयो विपरीतं वेति संदेहः। तत्र प्रकृतेः पूर्वविहितानात्प्राकृतानां पुरः क्रिया। पश्चात्तु वैकृतानां स्याद्दूर

© Dharmartha Trust J&K. Digitized by eGangotri

२ग०प० एवमदर्शनात्प्रदाक्षणीयादिषु पुनः श्रवणं तु गुणार्थत्वात्तत्पश्चादनुष्ठानं दाक्षणीयादीनां गमयति गुणानां परतंत्रत्वाद्यत्र गु-
३३ णी तत्र तेषां विधानमतः प्राकृतानां पूर्वानुष्ठानं। उच्यते॥ ॥गुणार्थेऽप्यूयमाणानामपि प्रत्यक्षपाठतः। पश्चादवगतेस्ते-
13 षां युक्ता पश्चादनुष्ठितिः। गुणत्वाभेऽपि कीर्त्यमानानां दाक्षणीयादीनां तत्र तावदवगतिर्जायते॥ सा च प्रत्यक्षपाठनिमि-
त्ता गुणगुणिनोः समानस्थानत्वात्तत्रैव गुणिनामनुष्ठानं गमयती। सानुमानिकपाठनिमित्तं पूर्वानुष्ठानमनादरणीयं
॥ ॥सन्निपातश्चेद्यथोक्तमन्ते स्यात्॥ ॥तत्रैव दीक्षणीयाद्यनंतरं रुक्मप्रतिमोचनाद्याम्नातं। प्रकृतौ च दीक्षणीयान-
नंतरं दीक्षितसंस्काराः तदिह किं रुक्मप्रतिमोचनादिकृत्वा दीक्षितसंस्काराः कार्या विपरीतं वेति। तत्र प्रत्यक्षपाठेन दीक्ष-
णीयाद्यनंतरं रुक्मादिकमनुष्ठेयं पश्चात् दीक्षितसंस्कृतिः॥ ॥उच्यते॥ ॥दीक्षादीक्षितसंस्कारानुपस्थापयति
क्रमात् तेषामुपस्थितानां च नाक्षिपा हेतुरस्ति नः। प्रकृतित्वक्रमवशेनानंतरमुपस्थितान् दीक्षितसंस्कारान् कृत्वा
पश्चात् क्रियमाणस्य रुक्मप्रतिमोचनादेः पश्चात्पाठोपपत्तौ नावश्यमनंतरानुष्ठानमनंतरपाठो ह्यवश्यपठितव्यत एम
१३

© Dharmartha Trust J&K. Digitized by eGangotri

याण्युपपात्तो नानन्तर्यं गमयति सावित्रहोमादेः – पश्चादनुष्ठाने पूर्वेण पादः स्यादिति विशेषः ॥ ॥इति शास्त्रदीपिकायां पंच
मस्य द्वितीयः पादः ॥ विरुद्धिः कर्मभेदात्प्रयाजाभ्यावृत्तस्मत्तस्योपदिश्येत ॥ ॥एकादश प्रयाजान्यजति। षडुपसद इति प्रा
कृतानां संख्याविवृद्धिर्विकृतौ श्रूयते सा किं प्रत्येकं भवत्युत सर्वसंपादिनीति चिंत्यते ॥ ॥तत्रोद्दिश्य प्रयाजादिसंख्यातस्यो
पदिश्यते। उद्देश्यानां च साहित्यं शक्यते न विवक्षितुं। तस्मादस्ति प्रयाजं प्रत्युपसदं च संख्यास्यादिति प्राप्त उच्यते ॥ ॥प्र
याजादिस्वरूपे हि नेयं संख्या विधीयते। अशक्यत्वात्प्रयोगे तु लक्षिते सोपदिश्यते। न त्येकैकशः समुदितानां। वा स्वरूपेण सं
ख्यान्वयः संभवत्येकस्य पंचानां चैकादशत्वासंभवात्। अतः संख्यान्वयसिद्ध्ये प्रयाजाः स्वप्रयोगं लक्षयंतीति नेच लतक्षयंत
स्तेनाभिधानात्सहायगतास्तथैव लक्षयंति। संख्या चेयमनेकवृत्तिस्वभावा समस्तलक्षितप्रयोगगता पि शक्नोति तर्वेषां
प्रयाजानामुपकर्तुं। अतः सर्वसंपादिनी स्यात्। स्वस्थानानुविद्धप्रेरनकृतानुपूर्व्यत्वात्। षडुपसद इत्यत्र सर्वसंपादिनी
संख्येत्युक्तमनतिस्तिसृणामुपसदां द्विरभ्यासः। तत्र किं द्वंद्वकलितवद्वावृत्तिरुत स्वस्थानवृद्धिरिति चिंतायामो वृत्तिन्याय

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा.प. नांतोके त्रिरनुवाकः पध्यनामित्यादौ दंडकलितवद्दा वृत्तिदर्शनादिहापि तथा स्यात्‌॥ ॥अतः सर्वाः सकृत्कृत्वा पुनः स्याद्द्वितः क्रि
१४ या। स्वस्थानानुविवध्येरन्नक्रमबाधोन्यथा भवेत्‌। ततो यां कृत्वा प्रथमायां क्रियमाणायां प्राकृतक्रमबोधः स्यात्‌। अतस्तद्
14 बाधापत्ते स्वस्थाने द्विर्द्विरभ्यसितव्याः॥ ॥समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युर्द्यावापृथिव्योरन्तरालस
मर्हणात्‌। एकविंशतिमनुब्रूयादिति सामिधेनीनां विशिष्टसंख्याकतावागमे कृते त्वस्मिन्‌ अग्रागम्यमानानामत्र चान्ते सश्चिंत्यते
किमन्ते निवेशोथवा समिध्यमानवतीं समिद्धवतीं चांतरे उत या धाय्याः श्रोक्तास्तास्तयोर्मध्ये न्येत्वागंतव्योत इति। तत्रा
न्ते तु बादरायण इति न्यायात्‌ सर्वाः प्राकृतीनामन्ते स्युरित्युपक्रममात्रेण प्रथमः पक्षः॥ इयं वै समिध्यमानवती असौ
समिद्धवती यदन्तरा तद्धाय्या इति धाय्यानामाकाशत्वेन स्तवनं द्यावापृथिवी संस्कृतयोः समिध्यमानसमिद्धवत्योर्म
ध्ये तासां विधानमनुमापयति। सर्वाश्चागन्तवो धीयमानत्वाद्धाय्या इति सर्वासामन्ते निवेश इति द्वितीयः॥ सिद्धा
न्तस्तु न धीयमानमात्रवचनो धाय्याशब्दः स्तुतिशब्दाद्यर्थतया धीयमानास्वपि तद्दृष्टाभावात्‌। अतो यत्रैव धाय्या राम १४

© Dharmartha Trust J&K. Digitized by eGangotri

रा द्रिकायां अग्नेर्नीतेर्वा जिनेत्येतस्मात्त्रिषु भोक्ते निवेशात्त्रिष्टुभा परिदधातीत्यादिदर्शनमुपपन्नं भवति। तस्माद्धाय्याशंद्रिकाना
मन्त्र एव निवेशः॥ ॥स्तोमविवृद्धौ बहिष्पवमाने पुरस्तात्पर्यासादागन्तवः स्युस्तथाहि दशहादशाहे ज्योतिष्टोमे बहिष्पवमाने
त्रयस्तृचोस्तोत्रीयोऽनुपः पर्यासश्च। ते विवृद्धस्तोमकेषु क्रतुषु प्राप्तास्तत्रागमेन संख्यापूरणं वक्ष्यते। तत्रागम्यमानानाम्
चामते निवेशः प्राग्वा प्राकृतात्पर्यासादिति संशयः॥ ॥तत्र प्रत्यक्षपाठेन द्वादशाहे वृषण्वतां प्राक्पर्यासान्निविष्टत्वादन्य
त्राप्यनुमीयते। द्वादशाहे षाडहिके द्वितीयेहनि विवृद्धस्तोमके प्राकृतो स्तोत्रीयानुरूपौ पठितौ ततः आगन्तवो वृषण्वत्यस्तृचः
पठिताः। ततः पश्चात्प्राकृतः पर्यासः पठितः। तदनेन पाठेन प्राक्पर्यासादागन्तूनां निवेशदर्शनादन्यत्रापि सर्वत्र सर्वेषा
मागन्तूनां तत्रैव निवेश इति सामान्यतोदृष्टमात्रेण पूर्वपक्षप्राप्तिस्तां पर्यासशब्दश्चान्तवचनो लोके वेदे च प्रसिद्धः। स्ते
त्रयपर्यासो नदीपर्यास इत्येवमादि तथागन्तवोन्तेस्युः पर्यासस्समाख्या प्राकृतस्य तच्च स्यबाध्येतोतोपि प्राक्पर्यासान्निवेशः
उच्यते॥ ॥नेदृशेनानुमानेन शास्त्रार्थोध्यवसीयते। समाख्या प्रकृतावेव चरितार्थेति साप्यतः॥ ॥अन्ते निवेश माग

© Dharmartha Trust J&K. Digitized by eGangotri

शा०प०
१५

तोन्यथिप्राप्तं न बाधते। द्वादशाहविकारेपि केवलानां पृष्ठ एव तां। प्राक्रयासान्निवेशः स्यादतिदेशविधेर्बलात्। अग्निष्टोमगं त
वोंतेस्युर्वादरायणदर्शनात्॥ ॥अन्ते तूत्तरयोर्दध्यात्॥ ॥विश्वजिदग्निष्टोमकेष्वेव न तूत्तरयोर्माध्यंदिनार्भवमानयोः सामाग
मोवस्यते तत्रागम्यमानानां साम्नां किमंसेत्त्वे निवेशोथवा गायत्री बृहत्यनुष्टुप्स्विति। तत्रागंतुत्वादंत्ये निवेशः॥ यत्तुत्री
णि ह वै यज्ञस्योदरणि गायत्री बृहत्यनुष्टु—ब्त्येवावयंतिअत एवोद्वपंतीति। तत्त्वविधिरूपत्वात् यथाकथंचिन्नेयमिति
॥ ॥अपूर्वत्वात्तु वचनमेवेदमनारभ्याधीतं सर्वयज्ञविषयमतो गायत्र्यादिष्वेव निवेशः। अथवा नैवात्र विचारः पू
र्वोक्तवहिष्पवमानग्रहणप्रसुदाहरणमात्रमिदं बहिष्पवमान एवांते निवेशः। उत्तरयोस्तु गायत्र्यादिष्वेव निवेशो व
चनादिति॥ ॥अहेष्टकमोपानुवाक्यं सवनचितिशेषः स्यात्॥ ॥अंशुं गृह्णाति अदाभ्यं गृह्णाति चित्रिणी रूपद
धाति वज्रिणीरूपदधातीत्यनारभ्याधीतं अहेष्टकं किं सवनचितिशेषः अतश्च प्रतिसवनं प्रतिचितिचावरकर्तव्यामा
हवनोपस्य निष्पन्नत्वादाधानमात्रस्य निरपेक्षस्य तदुत्साहकत्वात्पवमानहविर्भिस्तु निष्पन्नस्यैवाहवनीयस्य सं

एम
१५

15
कांडे

स्कारमात्रं क्रियते। पूर्वमेव त्वाहवनीयादयो निष्पन्नाः। निष्पन्नेषु तेषु मेविनत्यं कर्मभिरिति प्राप्ते उच्यते। न निरपेक्षमाधान
मग्नीनामुत्पादकं पवमानहविषामपि तदुत्पादकत्वात्। न चाचिकल्पस्तेषामाधानोत्तरकाले विधानात्। अतः समुत्पन्ना
नां तदुत्पादकत्वान्न तेभ्यः प्रागाहवनीयनिर्वृत्तिः। यदा त्वाधानाङ्गं पवमानहवींषि तदाप्यनङ्गेन प्रधानेन साध्या निष्पत्तेस्त
दुत्तरकालमेवाग्निनिष्पत्तिः। यत्तूक्तं निष्पन्नस्यैवाग्नेः संस्कारमात्रं हविर्भिरिति तथाप्यस्य संस्कारस्याहवनीयकार्यो
पयोगित्वात्तेन विना निष्पन्नस्याप्यग्नेरग्निहोत्रादिकार्याक्षमत्वात्तदुत्तरकाले च कर्म्मणां प्रवृत्तिः॥ ॥ संचिते त्वग्निचि
द्युक्तं प्रापणान्निमित्तस्य॥ ॥ अग्निचिद्व्रतानि वर्षति न धावेदित्यादीनि चयनानन्तरमेव भवन्ति क्रत्वन्ते वेति संशये धात्वर्थ
श्चयनं भूतं निमित्तं तदनन्तरं। व्रतान्यतः प्रवर्तेरन्नाहिताग्निव्रतादिवत्॥ ॥ नैवं॥ ॥ भावनाया निमित्तत्वं धात्वर्थस्तूपसर्जनं
। तस्याश्च फलनिर्वृत्त्या निर्वृत्तिरुपलक्ष्यते। न त्वग्नेश्चयनस्वरूपनिर्वृत्तिर्निमित्तं तत्करणिका त्वग्निकर्मिका भावना भूता निमि
त्तं तस्याश्चाग्न्युपकारो भाव्यः सोऽपि च क्रत्वन्तं साध्यतोऽग्नेर्धारणं तत्त्वाक्रतुसमाप्तेरिति तन्न ततः प्राङ्निर्वृत्तं भवति। तन्निर्वृ

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा०प०
१६

स्याच्च विनान भावनानिर्वृत्तिः। फलापवर्गित्वाद्भावनानामाधानस्य त्वग्निगतमदृष्टं भाव्यं तद्यानंतरमेव निर्वृत्तमिति विशे
षः॥ ॥परेणावेदनाद्दीक्षितः स्यात्सर्वैर्दीक्षाभिसंबंधात्। आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण इति दीक्षि
दंडेन दीक्षयतीत्यादि च श्रूयते। न च किं सर्वैर्दीक्षितो भवत्युत दीक्षैव दंडादीनि तु तत्संजननानीति। सर्वेषां तादर्थ्यावगमाद्
दीक्षार्थानां चैकप्रयोगविधिसंग्रहात्समुच्चयसिद्धेः सर्वांते दीक्षासंग्रह इति प्राप्तेऽभिधीयते। निरपेक्षैव वाक्येन दीक्षा
र्थैर्विधीयते। दंडादित्वक्रियारूपं तद्युज्ज्ञानतयोच्यते। दीक्षिष्यमाण इति त्वदृढक्रियार्थायां क्रियायामुपपद्येविधीयते
तेन दीक्षार्थत्वमिष्टं दीक्षा च क्रत्वंगभूतयमनियमसंग्रहस्तं करिष्यमाण एतावत्पर्यंतं पूर्वपक्षी योग्यं थः नोऽमुख्येन प्रागाग्नं
गं सकृदेव कर्तव्यमिति। प्रत्यक्षेणाग्रहैरिष्टकाभिश्च सवनानां चितीनां चारंभदर्शनात्तादर्थ्यमित्यते पूर्वपक्षवादी। निष्फ
लत्वात्सवनचितीनां फलवज्ज्योतिष्टोमांगत्वं ग्रहाणामिष्टकानां च फलवदग्न्यंगत्वं युक्तं। इष्टकाभिरग्निं चिनुत इति वचा एम
चनिकमेवाग्न्यंगत्वं॥ ॥अंते सुत्यकालमात्। स्थिते सकृदनुष्ठाने क्रमाश्रिंत्यते। किं चित्रिण्यादीनामुत्तमायामुपधानमु १६

© Dharmartha Trust J&K. Digitized by eGangotri

तमध्यमायामिति ॥ स्रु. स्तक्रमाद्यवायार्थमनेनारभ्यचोदिताः ॥ यांकांचिदिति वासं तु विधयेन भवत्यलं । सर्वासामिष्टकानां
पठितेन कल्पितेन वा ब्राह्मणेन न दृष्टास्सर्वासां च मध्यमायामुपधानोसंभवाद्यासां मध्यमायामुपधानं म्नातं तदनुवाद
मात्रमिदं यांकांचिद्ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चिना चितिन तु विधायकमतः स्रु. स्तक्रमाणां प्राक
रणिकीनामव्यवायार्थमनारभ्याधीतानामुत्तमायां निवेशः ॥ उच्यते वचनान्मध्यमायां स्युः प्रत्यक्षब्राह्मणोदिताः । ज्ञाना
नि रश्मिपूर्वेयं प्रत्यक्षे वर्ततियतः । वाक्यं चार्थवदेवं स्याद्वादमात्रं त्वनर्थकं । चित्रिण्यादेर्न्निवेशोतो मध्यमायां निती भवेत् ॥ ॥
प्राग्लोकंपृणायास्तस्याः संपूरणार्थत्वात् ॥ ॥ स्थितं मध्यमायां निवेश इति । तत्रापि किं प्राकरणिकीनामनेन चित्रिण्या
दीनां निवेशः । अथवा लोकंपृणायाः प्रागिति । तत्राव्यवायार्थमनेस्युर्लोकंपृणायास्तु यदेवास्यां नं यच्छिद्रं तदेतया पूर
यति लोकंपृणाच्छिद्रंपृणेति यत्पूरणार्थत्वं तच्चित्यंतरेपि सावकाशं । नहि सा मध्यमामात्रविषया मंत्रमात्रस्य प्रत्यक्ष
विधानादिष्टकायास्तु कल्प्यं विधानमतश्चित्यंतरेपि सावकाशत्वान्न्यायप्राप्तचित्रिण्यादीनामनेन निवेशः शक्य

© Dharmartha Trust J&K. Digitized by eGangotri

शा०प० तेबाधितुमिष्यते निवेशः। नैवमविशेषश्रुतस्य वचनस्य न्यायमात्रेण संकोचासंभवात्॥ ॥मध्यमायामपि चितावंते
३९ लोकंपृणा भवेत्। पूरणार्थेति तस्याः प्राक्त्रिणिष्यादेर्निवेशनं॥ ॥संस्कृते कर्म्मसंस्काराणां तदर्थत्वात्। आधानप्रकरणे
पवमानहवींषि विहितानि तान्याधानाद्विप्रकृष्यंते द्वादशसु रात्रीषु निर्वपेदित्यादिभिस्तत्राग्निहोत्रादीनि किमाधाना
नंतरमेव प्रवर्त्तंते। उत तेषु कृतेष्विति विचार अत्रत्यग्रंथशंचदशपत्रनिरंकृतप्रष्टेःप्रथमपंक्तौ स्यपुरुषस्य दाक्षिप्यमाणशब्द
निर्दिष्टस्य संस्कारार्थेष्टिः सा च निरपेक्षावगम्यते। तद्यदि दंडादिष्वपि वर्णमन्यथा नोपपद्येत। ततो नैरपेक्ष्यं बाध्येत। त
त्तु व्यंजनतयाप्युपपन्नं नानिरपेक्षश्रुतिं बाधितुं क्षमते। किंच दंडादीनि द्रव्यरूपाणि नोदासीनानि संस्कारं जनयं
ति। न चैषामाश्रयभूतेतिकर्त्तव्यता भूता वा काचित्क्रिया श्रूयते ततः कथं दंडादिभिः संस्कारो जन्येतेति न ज्ञायते।
अभिव्यक्तिस्तु दृष्टत्वात्प्रमाणांतरदृष्टसंयोगादिवशेनैव शक्नोति संपादयितुं। तस्मादिष्ट्यंत एव दीक्षितस्याभिव्यंजन
मात्रार्थं दंडादयः इष्ट्यंत एव दीक्षितधर्माः प्रवर्त्तेरन्॥ ॥अंगवत्क्रतूनामानुपूर्व्यं॥ ॥क्रत्वंतराणामेष्टाग्नाद्य राम १७

नां काम्यानां नैमित्तिकानां च क्रमेण पठितानामंगानामिव पाठवशात्क्रमनियममाशंक्य स्वयमविधायकत्वाद्विधायकस्य
चैषामेकस्याभावान्नानाप्रयोगवचनैरेकैकश्येन विधीयमानानां मिथो न पेक्षणादनियमेन काम्यानां नैमित्तिकानां चोपनिप
तानां नास्ति क्रमनियम इति स्थितं ॥ ॥ य एतेनेत्यग्निष्टोमः प्रकरणात् ॥ ॥ क्लृप्तैतदेषामनियम इति स्थितं। क्वचित्तु वचनवशा
त्सोऽवधिर्भवति। तथा हि श्रूयते एष वाव प्रथमो यज्ञानां यज्ज्योतिष्टोमस्तस्मादेतेनेष्ट्वान्येन यजेतेति। तत्र किमेतच्छब्दः सर्व
संस्थं ज्योतिष्टोममेव निर्दिशत्युताग्निष्टोमसंस्थमिति। तत्राविशेषतः सर्वसंस्थो नेन विमृश्यते। अग्निष्टोमस्तु नित्यत्वात्संस्थान्तरा
गंतव्यो यतः। ज्योतिष्टोमस्याग्निष्टोमस्यानेजं रूपमिति तादृश एव प्रतीयते न संस्थान्तरयुक्तः ॥ तेषामागंतुत्वादपि च एतेनेति प्रकर
णनिर्देशात् ज्योतिष्टोमकरणिका भावना रेष्टेति शब्देन कथ्यते। न च संस्थासु तस्य करणत्वमाश्रयमात्रत्वात्तत्रत्वान्न च संस्थानां क्रतु
भावनानन्तर्भावः फलार्थत्वादग्निष्टोमसंस्था तु क्रतुभावनान्तर्गतेति तत्संस्थस्यैव परामर्शः। अथान्येनेति संस्थानां सन्निधानात्
। एतच्छब्दार्थे निरूपिते नेतरपेक्षोऽन्यशब्दः किं संस्थासु वर्तते। उताग्निष्टोमादन्यमात्र इति संशये। संस्था एवान्यशब्देन कथ्यं

© Dharmartha Trust J&K. Digitized by eGangotri

शा०भा० ते प्रकृताहिताः। नत्वेवं स्यान्न संस्थानामस्ति प्रकरणं यतः। ज्योतिष्टोमाधिकारो यं वाक्यशेषे च कीर्त्तनात्। यज्ञानामिति शब्देन
१८ सर्वे सन्निहिताहिते। तस्माज्ज्योतिष्टोमान्यत्वाविशेषात्संस्थानामेकाहाहीनसत्राणां चायमन्यवादइति सर्वेषां ज्योतिष्टो
मात्सथ्याङ्गावांगमनेन वाक्येन विधीयते॥ ॥एकस्तोमेवाक्रतुसंयोगात् पूर्वाक्षेपेणेदमारभ्यते। नसर्वनिर्देशः किंत्वेकस्तो
18
मानां त्रिवृदग्निष्टोमः पंचदशउक्थ्यः एकविंशः षोडशीत्यादीनामेवाकृतोवाक्यशेषात् यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते
दित्यादेरविशेषश्रवणं वाक्यशेषेणाविशेषव्यवस्थाप्यते। नत्वेवमन्यशब्देन त्वविशेषः प्रतीयते। वाक्यशेषस्तु संयोगमात्रे
णैवोपपद्यते। यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयतीति विनापि व्याख्यासंयोगमात्रेण त्रिवृदादीनामनेकस्तो
मकेष्वपि दीपकत्वं संभवातीत्यविशेषात्सर्वगा इति स्थितं॥ ॥पंचमस्य तृतीयः पादः॥ ॥क्रमकोयार्थशब्दाभ्यां
श्रुतिविशेषादर्थपरत्वाच्च॥ ॥किं श्रुत्यर्थाभ्यां तुल्यबलः पाठउत दुर्बल इति चिंत्यते। तत्राश्विनो दशमो गृह्यत इति श्रु राम
तं किमाश्विनस्य पाठक्रमात्तृतीयस्थाने ग्रहणमुत श्रुतिबलाद्दशम इति। तथाग्निहोत्रं जुहोति यवागूं पचतीति किं पा १८

© Dharmartha Trust J&K. Digitized by eGangotri

दृष्टादृष्टत्वापत्तेः क्रमस्य श्रुतार्थवशाद्धि पर्यय इति ॥ प्रामाण्याविशेषादनियमं मन्वानस्योत्तरं । क्रमे श्रुत्यैव विहिते पाठतः को नु कल्प
येत् । प्रयोजनविरोधे वा कः पाठमनुरुध्यते । कृत्वा हि पचमानस्य भवेत्तद्द्वयमनर्थकं । पाकश्चैव यवाग्वश्चनां पक्त्वा बुद्ध्या
दतः ॥ ॥ अवदानाभिघारणासादनेष्वानुपूर्व्यं प्रवृत्त्या स्यात् । दर्शपूर्णमासयोः सान्नाय्यधर्माः पूर्वं प्रवर्त्तन्ते । पश्चा
दाग्नेयधर्माः । प्रदानं त्वाग्नेयस्य प्रथमं पश्चात्सान्नाय्यस्य ततः स्विष्टकृदवदानं प्रयाजशेषाभिघारणं वेद्यामासाद
नं च किं प्रवृत्तिक्रमात्सान्नाय्यस्य पूर्वं भवत्युत मुख्यक्रमादाग्नेयस्येति प्रवृत्तिमुख्ययोर्बलाबलाज्ञानात्संदेहेऽनि
यमे प्राप्ते मुख्यक्रमो बलीयानिति स्यादेतस्मिन्किलाश्रीयमाणे प्रथम एकः पदार्थः प्रधानाद्धि प्रकृष्यते । अन्ये सर्वे सं
न्निकृष्टा भवंति । प्रवृत्तिक्रमे पुनराश्रीयमाणे बहूनां विप्रकर्षः । तस्मान्मुख्यक्रमो बलीयानतश्चात्र प्रधानावदानमु
दाहरणमित्युक्तं तंत्ररत्ने ॥ ॥ वचनादिष्टिपूर्वत्वं ॥ ॥ इष्टिपूर्वत्वं सोमस्याम्नातं । दर्शपूर्णमासाभ्यामिष्ट्वा सो
मेन यजेतेति । तत्किं नियतं उत विपर्ययोपि लभ्यत इति । वचनादिष्टिपूर्वत्वं सोमस्य पूर्वत्वस्य तु नैवं साक्षाद्वचनम

© Dharmartha Trust J&K. Digitized by eGangotri

श्रौ०प० स्ति। तस्मादिष्टिपूर्वत्वमेवस्यात्सत्यं न साक्षाद्दत्तिवचनं आधानानंतर्यं तु श्रुतं तन्न दृष्टान्तार्थादिष्टेः सोमपूर्वत्वं संजायते। न
१९ त्वाधानानंतर्यं सोमस्येष्टिपूर्वत्वे संपादयितुं शक्यं तच्च श्रुतं सोमेन यक्ष्यमाणोऽग्निमादधीतेति। सर्वश्चादधानः सोमेन
यक्ष्यमाण एव नित्यत्वात्सोमस्य अतः सोमेनानंतरं यक्ष्यमाण इत्येतदभिप्रायमिदम्। अतः सोमपूर्वत्वमपि स्यात्। उत ब्राह्म
19 णस्य सोमः स्यात्। स्थितेमधस्य हृद्ये चिंत्यते किं ब्राह्मणस्य सोमपूर्वत्वमेव उत तस्यापीतरवत्कल्प्याविति। तदर्थं चाचिंत्यते
किमाग्नेयो वै ब्राह्मणो देवतया स सोमेनेष्ट्वाग्नीषोमो भवति यदेवादः पौर्णमासं हविस्तदनु निर्वपेत्तर्हि सउभयदेवतो भव
तीति। अनेन वचनेन कृत्स्नौ दर्शपूर्णमासौ उद्दिश्य सोमा उत्कृष्येते। अथवा कर्मान्तरविधिरयमुत पौर्णमासीमात्रोत्कर्षः
अथ चैकहविरुत्कर्षः इति। यदि कृत्स्नोत्कर्षो ब्राह्मणस्य सोमपूर्वत्वमेव भवति। पक्षांतरे तु तस्याप्युभौ कल्प्याविति। तत्र
दृष्टे कृत्स्नोत्कर्षणं यस्माद्ब्राह्मणस्य विधीयते। तेनास्य सोमपूर्वत्वमुभयपक्षत्वं चैवेष्ट्यपोः। यद्यपि यदेवादः पौर्णमासं हविरि
त्येकदेशोत्कर्षः श्रूयते। तथापि समस्ततास्य त्वेन श्रुतं फलं नैकदेशान्तरादुत्पत्तुमर्हति। न चाफलस्यानुष्ठानमस्ती राम
१९

© Dharmartha Trust J&K. Digitized by eGangotri

नितस्याप्युत्कर्षः कृत्स्नोत्कर्षात्सोमपूर्वत्वमेव विप्रस्य क्षत्रियवैश्ययोरेव कृत्स्नद्वयमिति पूर्वः पक्षः। अत्र सिद्धांतदेशमाह। कर्म्मां
तरमिदं पौर्णमासो धर्म्मकं तन्नामकं वा विधीयते। एवं धात्वर्थविधिर्भवत्यश्रुतस्य चोत्कर्षेन कल्पितो भवतीति। नत्वे
तत्कर्मांतरं विशिष्टविधिगौरवान्नाम्नश्चानेकार्थकत्वेनाधर्म्मलक्षणावासुक्ता। प्रकरणात्तु पौर्णमास्या एवायं कालवि
धिः। तत्तं यागादीशस्यास्तूत्कर्ष एव दृश्येवमपर्यवसिते धिकरणे अनन्त ऐक्योपजीवनेन पूर्वपक्षं वक्तुं चिंतांतरं क्रियते। सो
मेन यक्ष्यमाणोग्निमादधीत न तु मती क्षेन्नन क्षत्रमिति किमयमस्तु न कृत्वा तिक्रमगम्याधानस्योत सोमस्येति। प्रकर
णादाधानस्येति प्राप्ते वचनांतरेणास्यामेव शाखायां पदह्रे वैनमित्यादिना धानकालानादरस्योक्तत्वात् सोमकाल
त्वाधएवायं यद्यपि शतपथे पहृतयाध्मानोवाक्तृतवोः सौरवस्तुवाव आदित्यउपस्ते षां पाध्मानमपहंतितस्माद्यदैवे
नं श्रद्धाचोपनमेदथादधीताथ यजेतेत्युक्तं। तथाप्यस्यां शाखायामविहितत्वादितस्य र एवायं सोमेनाधानानंतरं
यक्ष्यमाणस्यादतधीत तथा कुर्वन्सोमस्य तु नक्षत्रं संपरादिरिकं नाद्रियेनेति स्थितादुत्तरं न कृत्स्नोत्कर्षः पौर्णमासी

© Dharmartha Trust J&K. Digitized by eGangotri

श्रा०प्र० मात्रश्रवणाद्यनुनैकदेशात्सकलमिति समुदायादेवविहितात्सकलमिश्रदोषः। तस्मात्तत्तोत्कर्षोभावाद्ब्राह्मणस्याप्युभौकल्यौ
२० सिद्धौ। नस्तु। गर्ह्णीम एतन्न कृतस्तोत्कर्षोविप्रस्यापिद्दौकल्याविति। यत्तु पौर्णमास्युत्कर्ष इति तन्न सर्प्यामहे न सकलपौ
र्णमास्युत्कर्षः किंतु दःश इत्यपराम्भश्च मग्नीषोमीयमेवहिहविरुत्कृष्यते न्यत्तु यथा मासमवस्थितं॥ ॥तन्मात्ररहि
तत्वेन विप्रस्यापि पुराभवेत्। तेन तस्याप्युभावेव कल्प्यो क्षत्रियवैश्यवत्। पुरोडाशस्यनिर्देशेन फलेदेवताभावात्।
स्थितमग्नीषोमीयस्योत्कर्ष इति। स किं पुरोडाशस्योताज्यस्यापीति चिंतायां। तत्र। अग्नीषोमाभिसंबंधादाज्यस्यापी
तिमन्यते। विष्णुप्रजापतिभ्यां तु सोमात्स्यागयितम्भवेत् यद्यप्यग्नीषोमौ यद्युमनस्तथापि नाज्यमुत्कृष्टुमर्हति। सहि
प्रागापि विष्णुं प्रजापतिं वापश्यति। तस्मान्नाज्योत्कर्षः॥ ॥विकृतिः प्राकृतिकालत्वात्तद्घस्कालोत्तरात — नित्स्यपो:
प्रत्यक्षविशिष्टत्वात्। विकृतयो द्व्यहकालाः सद्यस्कालावेतिसंशये मवूतिवद्व्यहकालाः न च वचनविरोधः प्रकृतिवदेव। प्रवृ रम
त्तोहि पौर्णमास्यां पौर्णमास्यायजेतेति वाचनिकं कालं वचनान्तरवशादेकदेशेन योजयित्वा द्व्यहकालत्वमेवाश्रितम् २०

© Dharmartha Trust J&K. Digitized by eGangotri

।तथा विकृतावपि पशुस्ते स्यादिति विहितः काल एकदेश एव स्यात्। द्व्यहकालस्य प्रकृतितः प्राप्तत्वात्। वचनं त्विदं व्यवस्थानि
वृत्त्यर्थं प्रकृतिनां हि पौर्णमासीविकाराणां अमावास्याविकाराणां च तदह देवकालव्यवस्थायां प्राप्तायामव्यवस्थार्थं यि
ष्ट्या पशुस्ते स्यादिवचनं संभवति च द्व्यहयोरपि प्रवृत्ति विकृत्यर्द्धे हि कालत्वमेकास्याश्चतुर्दश्यामुपक्रमसंभवादतो द्व्यहका
लः उच्यते। न प्रत्यक्षः श्रुतः कालः संकोचं चोदकाद्व्रजेत्। सर्वाङ्गपुक्ता विकृतिः पंचदश्यामतो भवेत्॥ ॥सान्नाय्याग्नी
षोमीयविकारा ऊर्द्ध्वं सोमात्प्रतिकृष्यत्। नासोमयाजी सन्नयेत् ऐन्द्राग्नो वै ब्राह्मण इति वचनाभ्यां सान्नाय्याग्नीषोमीययोः सो
मोत्तरकालत्वं तद्विकाराणामप्यतिदेशात्तत्कालत्वमिति सुतरां तो परिस्थानं। तथा सोमविकारा दर्शपूर्णमासाभ्यां। इष्टि
पूर्वत्वं सोमपूर्वत्वं चोभयमस्तीत्युक्तं। अतः प्रकृतिवत्सोमविकाराणामपीष्टेः प्रागूर्द्ध्वं संभवं मन्यते। न त्वेवं। न हीष्टेः प्राणत्
स्थानं सोमस्याहास्य चोदितं। आधानानन्तरो — तु संजाजं प्राप्तं समर्थनः। आधानानन्तरत्वे च विकृतीनां नास्ति ध्याति। ज्योति
ष्टोमोर्द्ध्वकालत्वात् द्व्यहयोश्चतरसंभवात्। एष वाव प्रथमो यज्ञो यज्ञानामिति अनेन ज्योतिष्टोमानन्तरकालत्वाद्विकृतीनां

© Dharmartha Trust J&K. Digitized by eGangotri

शा०पं०
२१

नाधानानन्तर्यं संभवति ॥ एकश्चायमनंतरकालो नह्याभ्यां प्रकृतिविकृतिभ्यामवरोद्धुं शक्यः मस्य स्ववचनात् प्रकृत्या संगृहीतत्व
त्तिनविकृतेः संभवति। तत्संभवाच्च न विकृत्यः प्राग्भावमिष्टेर्लभते नचाहर्गणस्य कृतेरिष्टेः प्राक्त्वमुक्तं यदतिदिश्येत तत्र — तत्काल
त्वं तु साक्षादुक्तं प्रकृताविति तदेव विकृतिष्वतिदिश्यते। अतः सोमविकाराणां दशरादिः। परतः क्रिया। एवं निरूपिता सम्यक्
षट्प्रमाणक्रमस्थितिः ॥ ॥इति श्रीमहामहोपाध्यायश्रीपार्थसारथिमिश्रकृतौ शास्त्रदीपिकायां पंचमोऽध्यायः समाप्तः
॥ ॥ ॥

21

राम
२१

© Dharmartha Trust J&K. Digitized by eGangotri